"अपरं काव्यम् । अनुत्तमत्वं न्यूनतया साम्येन च सम्भवति" वृत्तिः ।

"तत्र स्यादितराङ्गं काक्वाक्षिप्तञ्च वाच्यसिद्ध्यङ्गम् । सन्दिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढ़म् । व्यङ्ग्यमसुन्दरमेवं भेदास्तस्योदिता अष्टौ" मू० ।

"इतरस्य रसादेरङ्गं रसादि व्यङ्ग्यं यथा "अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः । नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः" । अत्र शृङ्गारः करुणस्याङ्गम् । "मानोन्नतां प्रणयिनीमनुनेतुकामस्त्वत्सैन्यसागररवोद्गतकर्णतापः । हा ! हा ! कथं नु भवतो रिपुराजधानी–प्रासादसन्ततिषु तिष्ठति कामिलोकः" । अत्रौत्सुक्यत्राससन्धिसंसृष्टस्य करुणस्य राजविषयरताबङ्गभावः । "जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् । कृता लङ्काभर्त्तुर्व्वदनपरिपाटीषु घटना मयाप्तं रामत्वं कुशलवसुता न त्वधिगता" । अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्त्यैव रामत्वमवगम्यते । वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्व्वता तद्गोपनमपाकृतम् तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतयाऽङ्गतां नीतम् । काक्वाक्षिप्तं यथा "मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः । संचूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः पणेन"। अत्र 'मथ्नाम्येवेत्यादि' व्यङ्ग्यं वाच्यस्य निषेधस्य सहभावेनैव स्थितम् । "दीपयन् रोदसीरन्ध्रमेष ज्वलति सर्व्वतः । प्रतापस्तव राजेन्द्र ! वैरिवंशदवानलः" । अत्रान्वयस्य वेणुत्वारोपणरूपो व्यङ्ग्यः प्रतापस्य दवानलत्वारोपसिद्ध्यङ्गम् । "हरस्तु किञ्चित् परिवृत्तधैर्य्यश्चन्द्रोदयारम्भइवाम्बुराशिः। उमामुखे विम्बफलाधरौष्ठे व्यापारयामास विलोचनानि"।

अत्र विलोचनव्यापारचुम्बनाभिलाषयोः प्राधान्ये सन्देहः । "ब्राह्मणातिक्रमत्यागो भवतामेव भूतये । जामदग्न्यश्च वो मित्रमन्यथा दुर्म्मनायते" । अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् । "सन्धौ सर्व्वस्वहरणं विग्रहे प्राणनिग्रहः । अल्लावदीननृपतौ न सन्धिर्न च विग्रहः" । अत्र अल्लावदीनाख्ये नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपायः व्यङ्ग्यं व्युत्पन्नानामपि झटित्यस्फुटम् । "अनेन लोकगुरुणा सतां धर्म्मोपदेशिना । अहं व्रतवती स्वैरमुक्तेन किमतः परम्" अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्य्यक्योषिति बलात्कारोपभोगः स्फुटतया वाच्यायमान इत्यगूढ़म् । "वाणीरकुडुङ्गुड्डीणसउणिकोलाहलं सुणन्तीए । घरकम्मवावडाए बहूए सीअन्ति अङ्गाइम्" । अत्र दत्तसङ्केतः कश्चिल्लतागृहं प्रविष्ट इति व्यङ्ग्यात् "सीदन्त्यङ्गानि" इति वाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरम् । किञ्च यो दीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात् तदुक्तं ध्वनिकृता "अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते । तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्मतः" । यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्य्यासः यथा "दृष्ट्या केशव! गोपरागहृतया किञ्चिन्न दृष्टं मया तेनात्र स्खलितास्मि नाथ! पतितां किं नाम नालम्बसे । एकस्त्वं विषमेषु खिन्नमनसां सर्व्वाबलानां गतिर्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्व्वश्चिरम्" । अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां 'सलेशमिति' पदेन स्फुटतयावभासः । सलेशमितिपदस्य परित्यागे ध्वनिरेव । किञ्च यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावः तत्र प्रधानकृत एव काव्यव्यवहारः तदुक्तं तेनैव "प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम् । धत्ते रसादितात्पर्य्यपर्य्यालोचनया पुनरिति" । यत्र च "यत्रोन्मदानां प्रमदाजनानामभ्रंलिहः शोणमणीमयूखः । सन्ध्याभ्रमं प्राप्नुवतामकाण्डेऽप्यनङ्गनेपथ्यविधिं व्यधत्त" इत्यादौ रसादीनां नगरीवृत्तादिवस्तुमात्रेऽङ्गत्वं तत्र तेषामतात्पर्य्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः । तदुक्तमस्मत्सगोत्रकविपण्डितमुख्यश्रीचण्डिदासपादैः "काव्यार्थस्याखण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते कालान्तरे तु प्रकरणादिपर्य्यालोचनया भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशस्तस्यास्वादमात्रायत्तत्वादिति" । केचित् चित्राख्यं तृतीयं काव्यभेदमिच्छन्ति तदाहुः "शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्" इति तन्न यदि हि अव्यङ्ग्यत्वेन व्यङ्ग्याभावस्तदा तस्य काव्यत्वमपि नास्तीति प्रागेवोक्तम् । ईषद्व्यङ्ग्यत्वमिति चेत् किं नाम ईषद्व्यङ्ग्यत्वम् आस्वाद्यव्यङ्ग्यत्वम् अना-